# बहत्त्रय्यां प्रतिबिम्बितं ज्ञानविज्ञानम्

**डॉली जैन**

**''संस्कतं नाम दैवीवागन्वाख्याता महर्षिभिः।**
**भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती।।''**

आचार्यदण्डिनो अस्य कथनानुसारं संसारस्य सर्वासु परिष्कतासु भाषासु संस्कतभाषा प्राचीनतमा भाषा स्ति। विविधविधाः कलाः अनेकशः ज्ञानवीथीश्च प्रसतकर्त्री भारतस्य भारती देवभाषा कथिता। इयं गीर्वाणवाण्यस्ति। एवञ्च सम्पूर्ण जनमानसं ज्ञानसलिलेन आप्लावितकर्त्री अस्ति।

जगतः प्रथमः ज्ञाननिधिः ग्रन्थरत्नः ऋग्वेदो स्यामेव सुरभारत्यां निबद्धो स्ति। एवञ्च तदुपजीवि सम्पूर्णवैदिकसाहित्यं लौकिकसाहित्यमपि, यत् भारतीयलोकाभ्युदयस्य परमश्रेयसश्च साधकमस्ति, अस्यामेव संस्कतभाषायां लिखितमस्ति।

संसारस्य असंख्यानां भाषानामध्ये कापि वाणी ईदशी नास्ति, या संस्कतवाङ्मयस्य आकारात्मिका गुणात्मिका च समतां कर्त्तुं शक्या भवेत्। अस्यां धर्मः, दर्शनं, राजनीतिज्ञानं, विज्ञानं, चतुषष्ठिकलाः, अनेकानि शास्त्राणि च वर्णितानि। संस्कते कौटिल्यस्य वात्स्यायनस्य च रचनाः, नीतिशास्त्र–स्मतिशास्त्र–ज्योतिष्–आयुर्वेद–गणितेत्यादिभ्यः विषयेभ्यः सम्बद्धाः अनेकाः ग्रन्थाः विद्यमानाः सन्ति, ये भौतिकजीवनाय अपि परमोपयोगिनस्सन्ति।

विभिन्नानां कवीनां रचनाभिः संस्कतकाव्येषु विद्यमानस्य अस्य ज्ञानस्य पुष्टिः भवति। महाकविभिः स्वरचनासु राजनीति–ज्योतिष–दर्शन–संगीतशास्त्र–आयुर्वेद–सामुद्रिकज्ञान–धनुर्वेद–पशुविज्ञानेत्यादिभ्यः विषयेभ्यः सम्बद्धं स्वज्ञानं प्रकटीकतम्। एतदतिरिक्तानि दैनिकजीवनेभ्यः सम्बद्धानि नीतिपरकवाक्यानि तु संस्कतसाहित्ये प्रचुरतया प्राप्यन्ते। विभिन्नेभ्यः–विषयेभ्यः सम्बद्धैः निम्नलिखितैः उद्धरणैः इदं स्पष्टं भवति :–

१. **राजनीतिविषयकं ज्ञानम् :-** संस्कतस्य अनेकाः कवयः राजनीतौ पण्डिता आसन्। एषु माघः, भारविः, श्रीहर्षः, विशाखदत्तः इत्यादयः मुख्याः सन्ति। माघेन ''शिशुपालवधम्'' इत्यस्य ग्रन्थस्य द्वितीये सर्गे

षड्गुणाः, शक्तित्रयः, अङ्गपञ्चमं राजमण्डलमित्यादीनां पारिभाषिकशब्दानां प्रयोगः कतः यथा :–

**''षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः।**
**ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसो प्यलम्।।''**

*शिशुपालवधम्– २/२६*

इत्थमेव विशाखदत्तेन विरचितं ''मुद्राराक्षसम्'' इति नाटकं पूर्णतः राजनीतिपरकनाटकमस्ति। निम्नश्लोके चतुर्णां राजनीतिकोपायानां साम–दाम–दण्ड–भेदेत्यादीनाम् उल्लेखो स्ति :–

**''कौटिल्यधीरज्जुनिबद्धमूर्तिं मन्ये स्थिरां मौर्यनपस्य लक्ष्मीम्।**
**उपायहस्तैरपि राक्षसेन निकष्यमाणामिव लक्षयामि।।''**

*मुद्राराक्षस – २/२*

इत्थमेव श्रीहर्षेण ''नैषधीयचरितम्'' इति महाकाव्ये राजनीतेः सिद्धान्तानामनेकेषु स्थलेषु चर्चा कता। नीत्यनुसारं गुप्तचरा एव राज्ञश्चक्षूंषि सन्ति, अस्य भावस्याभिव्यक्तिः निम्नश्लोकः वर्तते :–

**''प्रतीपभूमैरिव किं ततो भिया, विरुद्धधर्मैरपि भेततोज्झिता।**
**अमित्रजिन्मित्रजिदोजसा स यद्विचारदक्चारदगप्यवर्तत।।''**

*नैषधचरितम् – १/१३*

इत्थमेव भारविना स्वस्मिन् ''किरातार्जुनीयम्'' इति ग्रन्थे राजनीतिविषयकं ज्ञानं प्रकटीकतम्:–

**''प्रभवः खलु कोशदण्डयोः कतपञ्चाङ्गविनिर्णयो नयः।**
**स विधेयपदेषु दक्षतां निति लोक इवानुरुध्यते।।''**

*किरातार्जुनीयम् – २/१२*

प्रस्तुते श्लोके राजनीतेः पञ्चाङ्गानामुल्लेखो स्ति।

२. **ज्योतिष्विषयकं ज्ञानम् :-** महाकविभिः स्वरचनासु ज्योतिषशास्त्र–विषयकं ज्ञानमपि प्रदर्शितम्। ज्योतिषशास्त्रे यदि चन्द्रमा सूर्यं विहाय कयोश्चित् द्वयोः ग्रहयोः मध्ये स्थितः भवति, तर्हि दुरुधरयोगः भवति। अस्य तथ्यस्योल्लेखः माघेन कतः :–

**''पवनात्मजेन्द्रसुतमध्यवर्तिना नितरामरोचि रुचिरेण चक्रिणा।**
**दधतेव योगमुभयग्रहान्तरस्थितिकारितं दुरुधराख्यमिन्दुना।।''**

*शिशुपालवधम् – १३/२२*

माघेन ज्योतिषशास्त्रसम्मतकेतोः उदयस्य दुष्परिणामः कथितः :–

**''व्योम्नीव भ्रकुटिच्छलेन वदने केतुश्चकारास्पदम्।''**

*शिशुपालवधम् – १/७५*

इत्थमेव श्रीहर्षस्य ग्रन्थे ज्योतिषशास्त्रस्य सिद्धान्तानामुल्लेखः अनेकेषु स्थलेषु विद्यते। बुधेन शुक्रेण च सह समयं व्यतीतयतः सूर्योत्कर्षस्योल्लेखः निम्नश्लोके विद्यते :–

**''अजस्रमभ्यासमुपेयुषा समं, मुदैव देवः कविना बुधेन च।**
**दधौ पटीयान् समयं नयन्नयं, दिनेश्वरश्रीरुदयं दिने-दिने।।''**

*नैषधीयचरितम् – १/१७*

दुरुधरयोगस्य उल्लेखः श्रीहर्षेण अपि कतः :–

**''अवादि भैमी परिधाप्य कुण्डले वयस्यया भ्यामाभितः समन्वयः।**
**त्वदाननेन्दोः प्रियकामजन्मनि श्रयत्ययं दौरधरीं धुरं ध्रुवम्।।''**

*नैषधीयचरितम् – १५/४२*

३. **दर्शनविषयकं ज्ञानम् :-** महाकवीनां महाकाव्येषु विभिन्नेषु स्थलेषु दर्शनशास्त्रस्य पाण्डित्यस्य परिचयः अनेकेषु स्थलेषु प्राप्यते। माघकाव्ये प्रथमे सर्गे नारदमुनिः श्रीविष्णोः स्तुतिः सांख्यमतानुसारं करोति :–

**''उदासितारं निगहीतमानसैः गहीतमध्यात्मदशा कथञ्चन।**
**बहिर्विकारं प्रकतेः पथग्विदुः पुरातनं त्वां पुरुषं पुराविदः।।''**

*शिशुपालवधम् – १/३३*

ब्रह्मणः निर्गुणस्वरूपस्य प्रतिपादनं नारदेण श्रीकष्णस्य स्तुतौ कतम् :–

**''उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमम्।**
**उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया।।''**

*शिशुपालवधम् –१/३२*

अनेनैव प्रकारेण नैषधकाव्ये विभिन्नानां दर्शनानां सिद्धान्तानां प्रयोगः अनेकत्र मिलति। निम्नश्लोके बौद्धदर्शनस्य प्रधानानां सिद्धान्तानां यथा – ''शून्यवाद–विज्ञानवाद–साकारतावाद– इत्येषामुल्लेखो स्ति।

**''या सोमसिद्धान्तमयाननेव शून्यात्मतावादमयोदरेव।**
**विज्ञानसामस्त्यमयान्तरेव साकारतासिद्धिमयाखिलेव।।''**

*नैषधीयचरितम् – १०/८८*

जैनदर्शनस्य त्रिरत्नानां (सम्यक्–ज्ञानं, सम्यक्–दर्शनं, सम्यक्–चरित्रं) उल्लेखः नैषधीयचरिते निम्नश्लोके विद्यते :–

**''न्यवेशि रत्नत्रितये जिनेन यः स धर्मचिन्तामणिरुज्झिता यया।**
**कपालिकोपानलभस्मनः कते तदेव भस्म स्वकुले स्ततं तया।।''**

*नैषधीयचरितम् – ६/७१*

४. **सङ्गीतशास्त्रविषयकं ज्ञानम् :-** अस्मिन् शास्त्रे नत्यगीतवाद्यानां समावेशः भवति। माघकाव्ये प्रयुक्तानां गायन–वाद्य–ताल–लय–स्वरेत्यादीनां संगीतस्य पारिभाषिकशब्दानां प्रयोगः तस्य संगीतशास्त्रस्य सूक्ष्मज्ञानस्य परिचायको स्ति :–

**''रणद्भिराघट्टनया नभस्वतः पथग्विभिन्नश्रुतिमण्डलैः स्वरैः।**
**स्फुटीभवद्ग्रामविशेषमूर्च्छनामवेक्षमाणं महतीं मुहुर्मुहुः।।''**

*शिशुपालवधम् – १/१०*

कस्मिन् समये को स्वरो उपयुक्तो भवति, माघः इदमपि संकेतयति। प्रातः काले पञ्चमेन, षड्जेन, ऋषभे च गायनं निषेधयति।

**''श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः**
**सततमषभहीनं भिन्नकीकत्य षड्जम्।**
**प्रणिजगदुरकाकुश्रावकस्निग्धकण्ठाः**
**परिणतिमिति रात्रेर्मागधा माधवाय।।''**

*शिशुपालवधम् – ११/१*

इत्थमेव नैषधकाव्ये संगीतस्य अनेका उद्धरणाः प्रमाणयन्ति यत् श्रीहर्षः सङ्गीतशास्त्रे निष्णात आसीत्। सप्तस्वराणामारोहावरोहक्रमः मूर्च्छना कथ्यते। श्रीहर्षस्य निम्नश्लोके वीणावादकस्य पञ्चमस्वरस्य मूर्च्छनायाः उल्लेखो स्तिः –

**''शशाक निह्नोतुमनेन तत्प्रियामयं बभाषे यदलीकवीक्षिताम्।**
**समाज एवालपितासु वैणिकैर्मुमूर्च्छयत्पञ्चममूर्च्छनासु च।।''**

*नैषधीयचरितम् – १/५२*

नलस्य विवाहसमये कतिपयानां विशेषवाद्यानां स्वरसंगतिमुल्लेखयन् श्रीहर्षेण स्ववाद्यज्ञानस्य परिचयः दत्तः।

५. **आयुर्वेदविषयकं ज्ञानम् :-** आयुर्वेदशास्त्रस्य मूलं संस्कतवागस्ति। आयुर्वेदैः सम्बद्धानां ग्रन्थानां रचना संस्कते एवाभवत्। संस्कतस्य कविभिः स्वरचनास्वपि आयुर्वेदस्य उल्लेखः कतः। माघेन आयुर्वेदशास्त्रस्य विभिन्नाः अङ्गाः अधीताः। स्वग्रन्थस्य प्रथमे सर्गे सः कथयति :–

**''स्वेद्यमामज्वरं प्राज्ञः को म्भसा परिषिञ्चति।''**

*शिशुपालवधम् – २/५३*

इत्थमेव सः कथयति यत् राजयक्ष्मारोगः रोगाणां नपो स्तिः :–

**''राजयक्ष्मेव रोगाणां समूहः स महीभताम्।।''**

*शिशुपालवधम् – २/९६*

रसायनसेवनस्य विधिः व्यायामस्योपयोगिता इत्यादीनां विषयाणामपि यथास्थानं विवेचनमस्ति। नैषधचरिते आयुर्वेदस्य संक्रामकरोगस्य सुष्ठुप्रकारेण अभिव्यक्तिः विद्यते :–

**''स्मारं ज्वरं घोरमपत्रपिष्णोः सिद्धागदङ्कारचये चिकित्सौ।**
**निदानमौनादविशद्विलासा साङ्क्रामिकी तस्य रुजेव लज्जा।।''**

*नैषधः – ३/१११*

तापशान्त्यैः प्रयुक्तस्य ''उशीर'' इत्यस्य प्रयोगः नैषधचरिते दमयन्त्याः विरहतापस्य शान्त्यैः कतः।

**''कन्यातःपुरबोधनाय यदधीकाशन्न दोषा नपं**
**द्वौ मन्त्रिप्रवरश्च तुल्यमगदङ्कारश्च तामूचतुः।**
**देवाकर्णय सुश्रुतेन चरकस्योक्तेन जाने खिलं**
**स्यादस्या नलदं बिना न दलने तापस्य को पि श्रमः।।''**

*नैषधीयचरितम् – ४/११६*

सर्पविषस्य प्रभावमपनेतुं जलस्य समर्थता कथिता स्ति।

६. **सामुद्रिकज्ञानम् :-** सामुद्रिकस्य उल्लेखः नैषधचरितस्य द्वितीये सर्गे अस्ति। हस्तयोः पद्मस्य, मत्स्यस्य, वज्ररेखाणां व वर्णनं, हस्तयोः पादयोः च रेखाणामुल्लेखः ग्रीवायाः तिसृणां रेखाणामुल्लेखः, तस्य सामुद्रिकज्ञानस्य परिचायको स्ति।

**''स्फुटारविन्दाङ्कितपाणिपङ्कजम्।''** *नैषधीयचरितम् – १/६५*
**''पदं किमस्याङ्कितमूर्ध्वरेखया।।''** *नैषधीयचरितम् – १/१८*

७. **धनुर्वेदिषयकं ज्ञानम् :-** धनुः निर्मातुं वंशे कुङ्कुमरेखां निर्माय तस्य परीक्षणं क्रियते। यदि रेखा स्पष्टाः भवति, तर्हि सः वंशः धनुषः निर्माणस्य योग्यः मन्यते। नैषधीयचरिते हंसः दमयन्तीं कामदेवस्य चापरूपं कथयन् तां धनुर्लता कथयति।

**''कामः कौसुमचापदुर्जयममुं जेतुं नपं त्वां धनु-**
**र्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ।**
**ग्रीवालंकतिपट्टसूत्रलतया पष्ठे कियल्लम्बया**
**भ्राजिष्णुं कषरेखयेव निवसत्सिन्दूरसौन्दर्यया।।''**

*नैषधीयचरितम् – ३/१२६*

दमयन्ती कामदेवस्य गुलिकाधनुषं लता अपि कथिता :–

**''त्वद्गुच्छावलिमौक्तिकानि गुटिकास्तं राजहंसं विभो-**
**र्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्मञ्जरीम्।**
**यन्नित्याङ्कनिवासलालिततमज्याभुज्यमानं लसन्-**
**नाभीमध्यबिला विलासमखिलं रोमालिरालम्बते।।''**

*नैषधीयचरितम् – ३/१२७*

ईदशाः स्थलाः श्रीहर्षस्य धनुर्वेदस्य ज्ञानस्य परिचायकाः सन्ति।

८. **पशुविज्ञानम् :-** पशुविद्यायाः उल्लेखा अपि संस्कतसाहित्ये प्राप्यन्ते। माघः पशुविद्यायाः ज्ञाता आसीत्। अतएव तेन गजाश्वोष्ट्रेत्यादीनां पशूनां प्रकत्याः मनोहरं चित्रणं कतम्। ग्रन्थस्य सप्तदशतमे सर्गे तेन गजविद्या विस्तारेण वर्णिता। गजानां वशीकरणस्योपायाः गम्भीरवेदीगजस्य लक्षणमपि तेन स्वकाव्ये निर्दिष्टम् –

**''प्रत्यन्यनागं चलितस्त्वरावता निरस्य कुण्ठं दधताप्यमङ्कशम्।**
**मूर्धानमूर्ध्वायतदन्तमण्डलं ध्रुवन्नरोधि द्विरदो निषादिना।।''**

*शिशुपालबधम् – १२/१२*

माघेन ''वल्गा''इत्यस्य प्रयोगस्य विधिः, अश्वारोहणस्य विधिः, अश्वधावनस्य विधिः इत्येषां सर्वेषामपि यथोचितं वर्णनं कतम्।

श्रीहर्षः शालिहोत्रस्य निष्णात आसीत्। हंसवर्णनस्य प्रसंगे सूक्ष्मवर्णनैः तस्य पक्षिविज्ञानस्य विशेषतायाः ज्ञानं भवति।

**''अयमेकतमेन पक्षतेरधिमध्योर्ध्वगजङ्घमङ्घ्रिणा।**
**स्खलन क्षण एव शिश्रिये द्रुतकण्डूयितमौलिशलयम्।।''**

*नैषधीयचरितम् – २/३*

एतदतिरिक्ताः दैनिकजीवनेभ्यः सम्बद्धाः, नीतिपरकाः सुभाषिताः तु संस्कते प्रत्येकस्मिन् स्थले प्राप्यन्ते। कतिपयानि उदाहरणानि :–

१. वणते हि विमश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः। (किरातार्जुनीयम २/३०)

२. उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता। (शिशुपालवधम्)

३. महीयांसः प्रकत्या मितभाषिणः। (शिशुपालवधम्)

४. सर्वः स्वार्थ समीहते। (शिशुपालवधम्)

५. अहो दुरन्ता बलवद्विरोधिता। (किरातार्जुनीयम) १/२३

६. हितान्न यः संश्रणुते स किं प्रभुः। (किरातार्जुनीयम) १/५

७. अंगीकतं सुकतिनः परिपालयन्ति। (किरातार्जुनीयम)

८. हितं मनोहारि च दुर्लभं वचः। (किरातार्जुनीयम) १/४

इत्थं प्रस्तुतैः उद्धरणैः अयं दष्टिगोचरः भवति, यत् संस्कतकाव्यनाट्यसाहित्ययोः ज्ञानविज्ञानं सन्निहितमस्ति न केवलं सन्निहितमस्ति, अपितु तस्य प्राचुर्यमस्ति। अतः नवसहस्राब्द्यां संस्कतसाहित्ये विद्यमानस्य ज्ञानविज्ञानस्य प्रचुरतायाः महत्तां अमान्यं कर्त्तुं नैव शक्नुमः।

*व्याख्याता – संस्कत,*
*६१२, गौतम बुद्ध निवास,*
*वनस्थली विद्यापीठ*
*टोंक (राज.)*

---000---